19E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२४**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये (19E446)**

| दिनांक : ०६/०६/२०२४ | गुण :८० | वेळ : स. १०.०० ते १.०० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१.अ) अनुवादं लिखत।(३तः२)** (२०)

१) तथा ह्यविप्रकृष्टाः कालदूतदृष्टय इवेतस्ततश्चटुलाः कृष्णशारश्रेणयः। प्रचलितलक्ष्मीनूपुरप्रणादप्रतिमा मधुसरघासङ्घातझङ्कारा जह्रादिरे। चिरं विवृतविकृतवदनविवरविनिःसृतवह्निविसरा वासरेऽपि विरसं विरेसुश्चिरमशिवार्थमशिवाः शिवाः। शवपिशितप्ररूढप्रसरा इव कपिकपोतकपोलकपिलपक्षतयः काननकपोताः पेतुः।

२) आत्मस्थसमस्तमत्तमातङ्गसाधनेऽप्यस्पृष्टो मदेन, भूतिमानपि स्नेहमयः पार्थिवोऽपि गुणमयः करिणामिव दानवतामुपरिस्थितः, स्वामितामिव स्पृहणीयां भृत्यतामप्यपरिभूतामुद्वहन्नेकभर्तृभक्तिनिश्चलां कुलाङ्गनामिवानन्यगम्यां प्रभुप्रसादभूमिमारूढः, निष्कारणबान्धवो विदग्धानाम्, अभृतभृत्यो भजताम्, अक्रीतदासो विदुषां स्कन्दगुप्तो विवेश राजकुलम्।

३) अत्रान्तरे पूर्वादिष्टेनैव रुदता वस्त्रकर्मान्तिकेन समुपस्थापितेषु वल्कलेषु, निर्दयकरतलताडनभियेव क्वापि गते हृदये, रटति राजस्त्रैणे, तारमब्रह्मण्यमूर्ध्वदोष्णि विरुदति विप्रजने, पादप्रणतिपरे फूत्कुर्वति पौरवृद्धे सहसैव प्रविश्य शोकविक्लवः राज्यश्रियः परिचारकः सदस्यात्मानमपातयत्।

**आ) टिप्पणीद्वयं लिखत।(३तः२)** (१०)

१) सिंहनादः

२) राज्यवर्धनस्य परिचारकाः।

३) राजप्रतिज्ञा।

**इ) ससन्दर्भं स्पष्टीकरणं लिखत।(३तः२)** (१०)

१) स्त्रियो हि विषयः शुचाम्।

२) अस्मिन्महाप्रलये धरणीधारणायाधुना त्वं शेषः।

३) श्रूयतां मे प्रतिज्ञा।

**प्र.२. सविस्तरम् उत्तरत।(२तः१)** (१०)

१) हर्षचरितकाव्यस्य ऐतिहासिकं महत्त्वं षष्ठोच्छ्वासस्य आधारेण सोदाहरणं स्पष्टीकुरुत।

२) हर्षचरिते षष्ठोच्छ्वासे हर्षराजस्य चित्रणं कथं कृतमिति सोदाहरणं सविस्तरं च लिखत।

**प्र.३.अ) अनुवादं लिखत।(३तः२)** (१०)

१) अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे मदगजघटाकारैर्नावां शतैरवमृद्नति।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं जलनिधिरिव व्योम व्योम्नः समोऽभूवदम्बुधिः।।

२) तावत्तच्छत्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं यस्यासह्यप्रतापद्युतिततिभिरिवाक्रान्तमासीत्प्रभातम्।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागैर्गर्जद्भिर्वारिवाहैरळिकुलमलिनं व्योम यातं कदा वा।।

३) नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसाद्राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः।।

**आ) टिप्पणीमेकां लिखत।(२तः१)** (०५)

१) षडविधं बलम्।

२) रविकीर्तिः।

इ) **ससन्दर्भं स्पष्टीकरणं लिखत।(२तः१)** (०५)

१) भयविगलितहर्षो येन चाकारि हर्षः।

२) लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसात्।

**प्र.४ सविस्तरम् उत्तरत।(२तः१)** (१०)

१) द्वितीयपुलकेशिनः ऐहोळेप्रशस्तिलेखस्याशयं विशदयत।

२) ऐहोळेप्रशस्तिलेखस्य ऐतिहासिकं महत्त्वं स्पष्टीकुरुत।

----------